# bhikShukopaniShath || 63 ||

# ભિક્ષુકોપનિષત્ ૬૩

## Document Information

Text title : bhikshukopanishhat

File name : bhikshuk.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : Roopa and Shrirang Nene (roopashri at hotmail.com)

Proofread by : Roopa and Shrirang Nene (roopashri at hotmail.com)

Latest update : October 18, 1999

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ભિક્ષુકોપનિષત્ ૬૩

ભિક્ષૂણાં પટલં યત્ર વિશ્રાન્તિમગમત્સદા ।
તન્ત્રૈપદં બ્રહ્મતત્ત્વં બ્રહ્મમાત્રં કરોતુ મામ્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં
પૂર્ણાત્ પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય
પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ અથ ભિક્ષૂણાં મોક્ષાર્થિનાં
કુટીચકબહૂદકહંસપરમહંસાશ્ચેતિ ચત્વારઃ ।
કુટીચકા નામ ગૌતમભરદ્વાજયાજ્ઞવલ્ક્યવસિષ્ટ -
પ્રભૃતયોઽષ્ટૌ ગ્રાસાંશ્ચરન્તો
યોગમાર્ગે મોક્ષમેવ પ્રાર્થયન્તે ।
અથ બહૂદકા નામ ત્રિદણ્ડકમણ્ડલુશિખા -
યજ્ઞોપવીતકાષાયવસ્ત્રધારિણો
બ્રહ્મર્ષિગૃહે મધુમાંસં વર્જયિત્વાષ્ટૌ
ગ્રાસાન્ભૈક્ષાચરણં કૃત્વા
યોગમાર્ગે મોક્ષમેવ પ્રાર્થયન્તે ।
અથ હંસા નામ ગ્રામ એકરાત્રં નગરે પઞ્ચરાત્રં
ક્ષેત્રે સપ્તરાત્રં તદુપરિ ન વસેયુઃ ।
ગોમૂત્રગોમયાહારિણો નિત્યં ચાન્દ્રાયણપરાયણા
યોગમાર્ગે મોક્ષમેવ પ્રાર્થયન્તે ।
અથ પરમહંસા નામ સંવર્તકારુણિશ્વેતકેતુજડભરત -
દત્તાત્રેયશુકવામદેવહારીતકપ્રભૃતયોઽષ્ટૌ
ગ્રાસાંશ્ચરન્તો

યોગમાર્ગે મોક્ષમેવ પ્રાર્થયન્તે ।
વૃક્ષમૂલે શૂન્યગૃહે શ્મશાનવાસિનો વા
સામ્બરા વા દિગમ્બરા વા ।
ન તેષાં ધર્માધર્મૌ લાભાલાભૌ
શુદ્ધાશુદ્ધૌ દ્વૈતવર્જિતા સમલોષ્ટાશ્મકાઞ્ચનાઃ
સર્વવર્ણેષુ ભૈક્ષાચરણં કૃત્વા સર્વત્રાત્મૈવેતિ પશ્યન્તિ ।
અથ જાતરૂપધરા નિર્દ્વન્દ્વા નિષ્પરિગ્રહાઃ
શુક્લધ્યાનપરાયણા આત્મનિષ્ઠાઃ પ્રાણસંધારણાર્થે
યથોક્તકાલે ભૈક્ષમાચરન્તઃ શૂન્યાગારદેવગૃહ -
તૃણકૂટવલ્મીકવૃક્ષમૂલકુલાલશાલાગ્નિહોત્રશાલાનદીપુલિન -
ગિરિકન્દરકુહરકોટરનિર્ઝરસ્થણ્ડિલે તત્ર બ્રહ્મમાર્ગે
સમ્યક્સમ્પન્નાઃ શુદ્ધમાનસાઃ પરમહંસાચરણેન
સંન્યાસેન દેહત્યાગં કુર્વન્તિ તે પરમહંસા નામેત્યુપનિષત્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં
પૂર્ણાત્ પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય
પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ ભિક્ષુકોપનિષત્સમાપ્તા ॥

*bhikShukopaniShath* || *63* ||

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*